# UNIVERSITY OF NORTH BENGAL

B.A. Honours 1st Semester Examination, 2019

## CC2-SANSKRIT

## CLASSICAL SANSKRIT LITERATURE (POETRY)

Time Allotted: 2 Hours | Full Marks: 60

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### विभागः-क

1. कस्यचिदेकस्य प्रश्नस्य उत्तरं प्रदेयम् – 12×1 = 12

(क) दिलीप-सुदक्षिणयोः अपुत्रकतायाः किं कारणम् ? सन्तानलाभाय दिलीप-सुदक्षिणाभ्यां किं कृतम्, इत्येतत् सर्वं 'रघुवंशम्' इति महाकाव्यस्य प्रथमसर्गानुसारं विशदयत। 3+9 = 12

(ख) संस्कृतालंकारदिशा 'रघुवंशम्' इति महाकाव्यस्य महाकाव्यत्वं प्रतिपादयत।

2. संस्कृतभाषायां देवनागरीलिप्याञ्च व्याख्या कार्या (एकस्य) 6×1 = 6

(क) क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥

(ख) प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः॥

3. वङ्गभाषया आङ्गलभाषया वा द्वयोः अनुवादः करणीयः – 3×2 = 6

(i) वैवस्वतो मनुर्नाम माननीयो मनीषिणाम्।
आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव॥

(ii) परस्पराक्षिसादृश्यमदूरोज्झितवर्त्मसु।
मृगद्वन्द्वेषु पश्यन्तौ स्यन्दनाबद्धदृष्टिषु॥

(iii) तं सन्तः श्रोतुमर्हन्ति सदसद् व्यक्तिहेतवः।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकाऽपि वा॥

4. संस्कृतभाषया देवनागरीलिप्या संक्षिप्तोत्तरं प्रदेयम् – (द्वयोः) 3×2 = 6

(क) "सम्पद्-विनिमयेनोभौ दधतुर्भुवनद्वयम्"– अत्र 'उभौ' इति पदेन कौ बोद्धव्यौ ? भुवनद्वयं किम् ? तौ कथं सम्पद्विनिमयम् अकुरुताम् ?